चुच्यावयिषणम्,     च्यावयित्वा,     चुच्यावयिषित्वा ;

प्रच्याव्य, प्रचुच्यावयिष्य, च्यावम् २, } चुच्यावयिषम् २ ; }
च्यावयित्वा २, } चुच्यावयिषित्वा २. }

(558) "च्युङ् गतौ" (I-भ्वादिः-955. सक. अनि. आत्म.)

च्यावकः-विका, च्यावकः-विका, [1]चुच्यूषकः-षिका, [2]चोच्यूयकः-यिका, [3]चुच्यावयिषकः-चिच्यावयिषकः-षिका ;

च्योता-त्री, च्यावयिता-त्री, चुच्यूषिता-त्री, चोच्यूयिता-त्री, चुच्यावयिषिता-चिच्यावयिषिता-त्री ;

— च्यावयन्-न्ती, — चुच्यावयिषन्-चिच्यावयिषन्-न्ती ;

— च्यावयिष्यन्, — चुच्यावयिषिष्यन्-चिच्यावषिष्यन्-न्ती-ती ;

च्यवमानः, च्यावयमानः, चुच्यूषमाणः, चोच्यूयमानः, चुच्यावयिषमाणः-चिच्यावयिषमाणः ;

च्योष्यमाणः, च्यावयिष्यमाणः, चुच्यूषिष्यमाणः, चोच्यूयिष्यमाणः, चुच्यावयिषिष्यमाणः-चिच्यावयिषिष्यमाणः ;

[4]प्रच्युत्-प्रच्युतौ-प्रच्युतः ; — — —

च्युतम्-[A]तः-तवान्, च्यावितम्-तः, चुच्यूषितः, चोच्यूयितः, चुच्यावयिषितः-चिच्यावयिषितः-तवान् ;

---

1. 'अज्झनगमां सनि' (6-4-16) इति दीर्घे, 'इको झल्' (1-2-9) इति सनः किरवेन, 'क्ङिति' (1-1-5) इति गुणनिषेधः। एवं सन्नन्ते सर्वत्र प्रक्रिया बोध्या।

2. यङन्तात्, द्वित्वे, 'गुणो यङ्लुकोः' (7-4-82) इत्यभ्यासस्य गुणे, 'अकृत्सार्वधातुकयोः—' (7-4-25) इति दीर्घः। एवं यङन्ते सर्वत्र प्रक्रिया ज्ञेया।

3. ण्यन्तात् सनि, 'सन्यङोः' (6-1-9) इति द्वित्वे, वृद्ध्यावादेशयोः अवर्णपरधात्वक्षरपरकत्वादभ्यासघटकोकारस्य, 'स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा' (7-4-81) इति पाक्षिके इकारे, रूपद्वयम्। एवं सर्वत्र ण्यन्तात् सनि प्रक्रिया बोध्या। 'स्रवति—' (7-4-81) इति सूत्रसार्थक्यायैव, ण्यन्तात् सनि धातोरस्य सर्वाणि रूपाणि प्रदर्शितानि।

4. 'ह्रस्वस्य—' (6-1-71) इति तुक्। एवं ल्यप्यपि ज्ञेयम्।

A. 'स्तोत्रावमानैर्दुतवेणुवीणैश्च्युताशुभैर्यामचरैर्युतं ते।' धा. का. 2-36.